National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2016; 1(4): 10-11
© 2016 NJHSR
www.sanskritarticle.com

**Dr. G. Sireesha**
Asst. Professor ,
Department of Sanskrit,
S.V. U. College of Arts,
Sri Venkateswara University,
Tirupati 517 502 – A.P.

**Correspondence:**
**Dr. G. Sireesha**
Asst. Professor ,
Department of Sanskrit,
S.V. U. College of Arts,
Sri Venkateswara University,
Tirupati 517 502 – A.P.

# रघुवंशमहाकाव्यमनुसृत्य वृद्धोपगमने संस्कारवतः फलम्

## Dr. G. Sireesha

**"अभिवादनशीलस्य नित्यं वृद्धोपसेविनः चत्वारि तस्यवर्धन्त आयुर्विद्यायशोधनम्"** इति वृद्धवचनात् परोपकारमेव परमधर्मत्वेन आचरतां महतां विषये अभिवादनसेवादि सत्क्रियाः आचरणीयाः। इदं संस्कारवतः जनस्य लक्षणम्। सर्वस्यापि जनस्य स्व प्रवृत्या वा पूर्वार्जितकर्मप्रभावाद्वा जीवनविषये सौख्यस्य विघातः साधारणतया सञ्जायते। कश्चित् आरोग्यभङ्गेः, कश्चित् प्रजाविहीनतायां कश्चित् शतृनां अभिगमे एवं रीत्या बहुषु विषयेषु सुखमप्राप्य बाध्यमानो भवति। सः एतस्य परिष्कारे वैद्यं मन्त्रविदं वा उपायसाधकत्वेन आश्रयति। अस्मिन्विषये सम्पूर्णविश्वासस्य अभावात् श्रद्धायाः अभावाद्वा वृद्धं न सम्यगाश्रयति। आश्रित्य वा तं मनः प्रीत्या उपसेवते। तदिमं विषयं आधारीकृत्य कालिदासः रघुवंशमहाकाव्यस्य प्रथमसर्गे सन्तानहीनः दिलीपः वृद्धं कुलगुरुं वशिष्ठं आश्रित्य नमस्कारभाषणादिक्रियाः कथं अनुसृतवानिति विषयमुखेन सामाजिकान् सन्दिशति।

राजा दिलीपः स्वजायया सह परिमितसैन्यपुरस्सरं कुलगुरोस्सकाशं गत्वा आश्रमादनतिदूरे एवं स्व रथं ससैन्यं वृसृज्य पद्भ्यामेव गुरोः आश्रमं गच्छति। इदमत्र चिन्तनीयमस्माभिः देवतादर्शनार्थं वृद्धानां दर्शनार्थं वा गमने नास्माकं सौन्दर्यसाधनानि आत्मरक्षणसाधनानि वा समीपवर्तीनि भवेयुः। भक्तिः श्रद्धा च यस्य सम्पूर्णतया वर्तते तस्य ते द्वे एव सौन्दर्यं आत्मशक्तिञ्च वर्धयतः। अत एव कालिदासेन –

**तस्मै सभ्याःसभार्याय गोप्त्रे गुप्ततमेन्द्रियाः।**
**अर्हणामर्हते चक्रुः मुनयोः नयचक्षुषे[1]।।**

इति प्रत्यपादि। अर्थात् यस्तु वृद्धोपसेवनविषये धर्मं सूक्ष्मतया पश्यति सः नयचक्षुः। तस्य कृते महान्तः स्वाभिमानं प्रयच्छंति। अत एव देवताक्षेत्रेषु पद्भ्यां गमनेन प्रदक्षिणादिभिः यः देहाभिमानं परित्यजतिः सः सद्यः देवतानुग्रहं प्राप्नोति इति वृद्धैः स्व आचारात् सन्दिश्यन्ते।

एवमेव वृद्धः दर्शनीयः इत्यत्रापि सम्यक् प्रतिपादयति कालिदासः। अनेन प्रतिपादनेन आत्मनः शुभकामना सिध्यतीति विज्ञायते। तथाहि –

**विधेः सायन्तनस्यान्ते स ददर्श तपोनिधिम्**
**अन्वासितमरुन्धत्या स्वाहयेव हविर्भुजम्[2]।।**

उत्तमकार्यं कुर्वतः वृद्धस्य दर्शनं उत्तमफलदायकं भवति।

**"गुरूरग्निर्द्विजातीनां वर्णानां ब्रह्मणो गुरुः"** इति उक्तदिशा स्व गुरुं अग्निं सेवमानस्य वशिष्ठस्य अभिवादनेन गुरुद्वयस्य अनुग्रहः अवश्यं भवतीति सूच्यते। एवं श्रद्धया सेवितः वृद्धः आत्मनः अभीष्टप्रदानाय अवश्यं उन्मुखो भवति।

यः कश्चिदपि लोके सुहृदः चिरन्तनमेलने स्वकुशलं पृच्छति। सुहृदपि जीवनसमस्याभिः बाध्यमानोऽपि आदौ स्वखीयक्षेमवार्तामेव वदेत्। तथाहि – दिलीपमुद्धिश्य वशिष्ठः यदा स्वकीयकुशलं पृच्छति दिलीपोऽपि आत्मनः सन्तानहीनतारूप समस्यामनुक्त्वा आत्मनः कुशलं वक्तुं एवमुपक्रमते।

**उपपन्नं ननु शिवं सप्तस्वङ्गेषु यस्य मे।**
**दैवीनां मानुषीणां च प्रतिकर्ता त्वमापदाम्[3]।।** इति।

अत्र अस्य दिलीपस्य विनयमाहात्म्यं तदनुसारेण गुरौ विश्वासश्च प्रकटी कृतः भवति। जीवनसमस्याः दैवमानुषरूपेण द्विधा भवन्ति। सर्वा अपि समस्या वस्तुतः दैवदुर्विपाकादेव जायते। अत एव आश्रितं वृद्धं देवताधिया उपसेवेत। अनया भावनया वृद्धानां सेवनात् धनं ससमृद्धि वर्धते इति दिलीपवचनात् निरूप्यते। यदुक्तं –

**त्वयैवं चिन्त्यमानस्य गुरुणा ब्रह्मयोनिना।**
**सानुबन्धाः कथं न स्युः सम्पदो मे निरापदः[4]।।** इति।

इदं च दिलीपवाक्यं **"चत्वारि तस्य वर्धन्त आयुर्विद्यायशोधनम्"** इति आप्तोक्तिप्रामाण्यं सूचयति। यद्यपि श्रद्धया विहितात् वृद्धानां दर्शनात् अपि च सेवनादेव आत्मनः समस्या परिह्रियते। यथापि आगमनस्य कारणं किमित्यत्र प्रश्नस्य समाधानार्थं जीवनसमस्या धर्मलोपकारिणी इति संस्कारवतो दिलीपस्य समाधानं एवं निरूप्यते। यत् **–**

**किन्तु वध्वां तवैतस्यामदृष्टसदृशप्रजं।**
**न मा मवति स द्वीपरत्नसूरपि मेदिनी**[5]।। इति

अत्र सन्तानहीनतायां भूमेः पालकस्य अभावात् प्रजानां अपरिरक्षणमेव मम धर्मलोपः इति दिलीपस्य अभिप्रायः। प्रायः लोके स्वकीयदुष्कामनाः पूरणार्थमपि वृद्धोपसेवने सर्वोऽपि प्रवृत्तो भवति। वर्तमानकाले ज्योतिर्विदान् वृद्धानाश्रित्य जनाः एवमेव सञ्चरन्ति। यः धर्मसम्बद्धतया जीवनं करोति तस्य विषये सद्यः फलदायकं उपायं सूचयन्ति। अधार्मिकजीवनस्य विषये यः कश्चिदुपायः न फलदो भवति। अत एव वशिष्ठः दिलीपस्य विषये कामधेनोः निरादरणरूपं दोषं दिव्यचक्षुषा संवीक्ष्य तत्सुतायाः नन्दिनीधेनोः सेवायै तमादिशत्।

कालिदासस्य अनेन प्रतिपादनेन परिज्ञायते यत् वृद्धानां समीपं प्रति गमने वा देवतानां समीपं प्रति गमने वा अस्माभिः सूक्ष्मं धर्मं विचार्य तयोरनुग्रहः यथा भवति तथा प्रवर्तनीयं इति। एवं बहवो नैतिकांशाः काव्येषु प्रतिपाद्यन्ते।

**Foot Note:**

1. Raghuvamsamahakavyam : 1.55
2. Raghuvamsamahakavyam : 1.56
3. Raghuvamsamahakavyam : 1.60
4. Raghuvamsamahakavyam : 1.64
5. Raghuvamsamahakavyam : 1.65

**Reference:**

Raghuvamsa of KalidasaWith sanjivini commentary of Mallinatha
V.Ramaswamy Sastrulu and Sons
292.Subhash Chandra Bose Road, Madras, 1954

* * *